# प्रथमे हि विद्वांसो वैयाकरणाः
## (मम्मटाचार्यस्य व्याकरणवैदुष्यम्)

**पूर्णिमा केळकर**

अवगतसर्वशास्त्रस्यहृदयो पि आचार्यमम्मटः मुख्यतया वैयाकरण आसीत्। काव्यप्रकाशे प्रथमोल्लासे एवोत्तमकाव्यस्य लक्षणं विदधता तेनोक्तम्– बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कतः। अत्र कः शब्दः ध्वनित्वेन व्यवह्रियत इति विषये वैयाकरणानां मतमुदाहृतम्। महाभाष्ये भगवता पतञ्जलिना – अथ शब्दानुशासनम्। इति वचसा प्रारभ्य अथ गौरित्यत्र कः शब्दः ? इति निरूपणावसरे अथवा प्रतीत पदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा– शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते। तस्मात् ध्वनिः शब्दः। इति प्रतिपादितम्।

एतन्मतानुसारिभिरन्यैरप्यानन्दवर्धनाचार्यप्रभतिभिरालङ्कारिकैःशब्दा–र्थयुगलस्य ध्वनिरिति व्यवहारः कतः। द्वितीयोल्लासे पि संकेतिताथस्य सविभागं विवेचनं वदति – संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा। शब्दस्य वाचकत्वं ''साक्षात् संकेतितं यो र्थमभिधत्ते स वाचकः'' इति सूत्रे स्फुटीकतम्। वस्तुतः शब्दस्य संकेतितार्थाभिधायकत्वं सकलसंकेतितार्थ–ज्ञानमन्तरेण न संभवतीति संकेतितार्थस्य विभागं दर्शयति। अत्र संकेति–तो र्थश्चतुर्विधो भवतीत्युक्तम्। तदनुसारेण जातिगुणक्रियायदच्छारूपा–श्चत्वारो र्थाः। महाभाष्यकारस्यापीदमेव मतम्। ऋलक् सूत्रे महाभाष्यकारः पतञ्जलिराह – गौःशुक्लश्चलोडित्थ इत्यादौ चतुष्टयी शब्दानां प्रवत्तिः। अस्यायमाशयो यत् शब्दानामर्थे या प्रवत्तिर्भवति सा प्रवत्तिनिमित्तभेदात् प्रकारचतुष्टयवती भवति। अस्मिन्नेव सूत्रे जातिरेव वा – इति वदता आचार्येण वैयाकरणसम्मतः जातिपक्ष एव समर्थितः। अलङ्कार–निरूपणावसरे दशमोल्लासे विरोधस्य लक्षणं कुर्वता जातिश्चतुर्भि–र्जात्याद्यैरित्यादिना पुनः जातिपक्षोनुमोदितः। अन्यत्र बहुषु स्थलेषु मम्मटस्य वैयाकरणत्वं स्फुटी– भवति। वैयाकरणानामनेके पारिभाषिकशब्दा आचार्येण व्यवहृताः। यथा असङ्गत्यलङ्कारे ''अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः'' इति परिभाषा उल्लिखिता। उपमानिरूपणे वैयाकरणमतमवलम्ब्य उपमायाः पूर्णा–लुप्तेति विभागद्वयं कल्पितम्।

आचार्यस्येदं व्याकरणशास्त्रवैदुष्यं दोषप्रकरणे सप्तेमोल्लासे बहुशः स्पष्टीभवति। अतः पत्रे स्मिन् कतिपयदोषानादाय तत्र तेषां व्याकरणमूलकत्वमनुशीलितम्।

दोषप्रकरणे दोषस्य सामान्यलक्षणं विधाय पददोषान् परिगणयति –

**दुष्टं पदं श्रुतिकटुच्युतसंस्कत्यप्रयुक्तमसमर्थम्।**
**निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलम्।।**
**संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्।**
**अविमष्टविधेयाशं विरुद्धमतिकत्समासगतमेव।।**

उपर्युक्तेषु पददोषेषु प्रायशो दोषाः व्याकरणनियमान् नानुसरन्तीति दोषत्वेन परिगणिताः। च्युतसंस्कतिदोषे स्पष्टमुक्तमाचार्येण – व्याकरणलक्षणहीनं यत् पदं तत् च्युतसंस्कतमुच्यत इति। अत्र संस्कति पदस्य संस्कारः व्याकरणलक्षणानुगमो वार्थः। व्याकरणनियमेन येषां न सिध्यति ते व्याकरणसंस्कारहीनाः शब्दाः शास्त्रे प्रयोगार्हाः न भवन्ति। यदि प्रयुक्तास्तर्हि दोषभाजः स्युः। तद्यथा–दीनं त्वामनुनार्थते कुचयुगं पत्रावता मा कथाः। अत्र अनुनाथते इति पदं व्याकरणलक्षणविरुद्धमतः च्युतसंस्कतिदोषग्रस्तम्। आशिषि नाथः इति वार्तिके नाथधातो–राशिष्येवात्मनेपदं विहितम्। अत्र तु याचनार्थे आत्मनेपदप्रयोगात् दोषावहः। अनुनाथति स्तनयुगमिति पठनीयम्।

अप्रयुक्तदोषः – अनुशासनसिद्धमपि अथवा आम्नाये पठितमपि कविभिर्यन्न प्रयुज्यते तस्य प्रयोग अप्रयुक्तदो भवति। यथा – यथायं दारुणाचारः सर्वदैव विभाव्यते तथा मन्ये दैवतो स्य पिशाचो राक्षसो थ वा। अत्र दैवतशब्दः अमरकोशे पुंस्याम्नातः। (दैवतानि पुंसि वा) अस्य पुल्लिङ्गप्रयोगः न केनचित् कविना क्रियते। तादशकविसमयलङ्घनं दूषकताबीजम्।

असमर्थः – यत् पदं यस्मिन्नर्थे समर्थं तत्रैव तस्य प्रयोगः कर्तव्यः। यतः तदर्थे तस्य शक्तिर्नियता। यदि अन्यार्थे प्रयुज्यते तदा तत् पदमसमर्थं भवति। यथा –

**तीर्थान्तरेषु स्नानेन समुपार्जितसत्कतिः।**
**सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम्।।**

अत्र हन्ति इति पदमसमर्थम्। धातुपाठे हन हिंसागत्योः इति गमनार्थे परिपठितो पि गमनार्थं न व्यनक्ति।

अवाचकः – उपसर्गयोगाद् धातवः अर्थान्तरं बोधयन्तीति नियमः। अतएवोक्तम् –

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहाराहारसंहारविहारपरिहारवत्।।**

यदुपसर्गसंसर्गाद् यमर्थमभिधत्ते तस्मिन्नेव शब्दस्य शक्तिः परिकल्पिता। उपसर्गमन्तरेण सो र्थश्चेदभिलषितस्तदा दोषावहो भवति। अथवा सोपसर्गेण धातुना केवलस्य धातोरर्थो विवक्ष्यते तदा अवाचको दोषः सम्पद्यते। यथा –

जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः इत्यादि श्लोके चतुर्थचरणे सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः। अत्र विदधत् इति प्रयोगो वाचकः। वि उपसर्गपूर्वकः दधदिति प्रयोगः विधाने रणे वार्थे समर्थः। कविना तस्य धारणार्थे प्रयोगः कतः। तेन विवक्षितार्थस्य बोधो न भवति। एतदेव दूषकताबीजम्। येन विवक्षितार्थो न बुधयते तत् पदं वैयाकरणानामपि नाभीष्टम्। अतएव महाभाष्यकारो वदति–दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो नतमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।

अत्र इन्द्रशत्रुः इति पदे इन्द्रस्य शत्रुरित्यर्थे तत्पुरुषे अन्तोदात्तत्वे कर्तव्ये पूर्वपदप्रकतिस्वरत्वं वत्रासुरस्य विघातकं जातम्।

सन्दिग्धः – यदा कश्चिच्छब्दप्रयोगः वक्तुः तात्पर्यबोधनाय न समर्थः अथवा अर्थविषये सन्देहं जनयति तदा श्रोतुरर्थनिश्चयाभावात् दोषो जायते यथा – आशीःपरम्परां वद्यां कर्णे कत्वा कपां कुरु। अस्मिन् पद्ये वन्द्यामिति पदे बवयोरभेदात् वन्द्यामित्यस्य नमस्यामित्यर्थः। तथा च हठहृतमहिलायामित्यप्यर्थो भवति। आदौ आशीःपरम्परां कर्णे कत्वा नमस्यां प्रति कपां कुरु इत्यर्थो बुध्यते। द्वितीये हठहृतमहिलायां कपां कुरु। इत्यर्थद्वयम् सन्देहस्य हेतुः। व्याकरणशास्त्रे महाभाष्ये शब्दानुशासनस्य प्रयोजनप्रतिपादनावसरे भाष्यकता असन्देहार्थमपि व्याकरणमध्येयम् इत्युक्तम्। स्थूलपषतीमाग्नीवारुणीमनड्वाहीमालभेत इति श्रुतिवाक्ये स्थूलपषती पदे समासविषयकः सन्देहो जायते। स स्वरमधिगम्य निवर्तते। अन्तोदातत्वे तत्पुरुषः पूर्वपदप्रकतिस्वरत्वे बहुव्रीहिरिति। एवमेव श्वेतो धावति इति वाक्ये श्वा इतो धावति/अथवा श्वेतो यः कश्चित् स धावतीत्यर्थद्वयविषये विनिगमनाविरहे श्रोतुर्मनसि सन्देहो जायते। अन्यत्र अष्टाध्याय्यां स्थाने न्तरतम उरण् रपरः इति सूत्रपाठे द्विविधार्थावगतिः।

अन्तरतमः इति प्रथमान्तपाठे स्थाने अन्तरतम आदेशो भवतीत्यर्थ। सप्तम्यन्ते अन्तरतमे पाठे अन्तरतमे स्थानिनि आदेशो भवतीति ज्ञानम्। अयं सन्देहः भाष्यकारेण व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् इति परिभाषया समाहितः।

अप्रतीतः–शास्त्रमात्रे प्रयोगार्हं किञ्चित् पदं यदि शास्त्रान्तरे प्रयुज्यते चेत् तदाभीष्टमर्थं न बोधयति। यथा–सम्यग्ज्ञानमहा–ज्योतिर्दलिताशयताजुषः। इत्यादौ आशयशब्दो वासनार्थः। वासना चात्र संस्कारविशेषो। यो हि मिथ्याज्ञानजन्यः। सो यं शब्दः पातञ्जलयोगशास्त्रे प्रसिद्धः। आशेरते फलपर्यन्तमिति आशयः। व्युत्पत्यनुरोधात् योगशास्त्र एव अस्य पदस्यार्थजनकत्वं सिध्यति। अन्यत्र लोके आशयशब्देन झटित्यर्थ–बोधो न भवतीति दोषः। व्याकरणशास्त्रे पि पारिभाषिकशब्दानां प्रयोगव्यवस्था कता शास्त्रकारैः। स्वं रूपं शब्दस्याशब्दसंज्ञेति सूत्रे स्पष्टमेव संकेतितं यत् तत्तत् शास्त्रस्य पारिभाषिकसंज्ञाः तत्तत् शास्त्रे पारिभाषिकमेवार्थं गमयन्तीति। यथा अदेङ् गुणः इति विहिता गुणसंज्ञा व्याकरणशास्त्र एव अ ए ओ इत्यादीनां बोधिका भवति। लोके तु गुणपदेन सामान्यमेवार्थं गम्यते। एवमेव वद्धिपदेन वद्धिरादैच् इति सूत्रविहिता आ ऐ औ इति वर्णाः बुध्यन्ते। अन्यत्र वद्धिपदं वद्धेरेव बोधकम्।

**ग्राम्यदोषः** – ग्रामे भवो ग्राम्य। यः शब्दः शिष्टजनप्रयुक्तो न भवति स ग्राम्य इत्युच्यते। टीकाकारैरुक्तम् – आपामरं सर्वलोकप्रसिद्धं ग्राम्यमिति। यथा – तपनीयशिलाशोभाकटिश्च हरते मनः इत्यादौ कटिपदं ग्राम्यम्। यतः श्रोणिनितम्बादिकमेव विदग्धैः प्रयुज्यते। कटिपद–त्वविदग्धमात्रप्रयोज्यमतः ग्राम्यम्। ग्राम्यशब्दश्रवणेन वक्तुरपटुत्वं गम्यते तेन श्रोर्तुवैमुख्यं भवति। एतदेव दूषकताबीजम्।

ग्राम्यविषये भगवतः पतञ्जलेरभिमतम् – भगवता पतञ्जलिना शास्त्रस्य प्रयोजनप्रतिपादनावसरे उक्तम् – समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः। शब्दैरेवार्थो भिधेयो नापशब्दैरिति। अत्र अपशब्दपदेन ग्राम्पदानि विवक्षितानि। यतः ग्रन्थकता अपशब्दान्र्तगताः ग्राम्यशब्दा एवोदाहृताः। तदुक्तम् – गौरित्यस्य शब्दस्य बहवो पभ्रंशाः गावी गोणी गोता गोपोतल्लिका इत्येवमादयो पभ्रंशाः। एते पशब्दा अर्थबोधने शक्ता अपि शास्त्रे न प्रयोगार्हाः। यदि शास्त्र एतेषां प्रयोगः क्रियते तदाधर्मो भविष्यति।

**अविमष्टविधेयांशः** – वाक्ये विधेयांशो मुख्यो भवति। यदि क्वचित् कदाचिद्वा विधेयांशो निर्दिष्टो नुक्तो वा तदा दोषो यमापतति। हनुमन्नाटके ष्टमे ङ्के रामसेनया लङ्कायां वेष्टितायां रावणस्येयमुक्तिः –

**मूर्ध्नामुद्वत्ताविरलगलगलद्रक्तसंसक्तधारा-**
**धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।**
**कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणाम्**
**दोष्णां चैषां किमेतत् फलमिहनगरीरक्षणे यत् प्रयासः।।**

अत्र रावणोक्तेरयमाशयः – एवं विधानां दोष्णां मूर्ध्नां चैतत् फलमनुचितमतः एतेषां मिथ्यात्वम्। मिथ्यात्वमेवात्र विवक्षितम् विधेयभूतं वा। तच्च न प्रतीयते। विधेयांशो हि प्रधानीभूतो भवति। तस्य समासान्तर्गतत्वात् प्राधान्यं तिरोहितम्। समास एकार्थीभावो भवति। समासार्थो इतरपदार्थे न्वितो भवति। अतःविधेयभूतस्य मिथ्यामहिम–शालित्वस्य गुणीभावेन अविमष्टविधेयांशत्वात् दोषः।

वस्तुतः वाग्देवतावतारस्य मम्मटाचार्यस्य व्याकता दष्टि प्रतिपदं व्याकरणस्य नियमान्ननुहरति। समासे एकार्थीभावरूपसामर्थ्यं वैयाकरणानामभीष्टम्। मम्मटो पि तदेव स्वीकरोति। कुमारसम्भवे एकस्मिन् पद्ये कविना–न्यासीकतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य। इत्यादौ द्वितीयमौर्वीमिव इति वदता विधेयांशो विमष्टः। अत्र द्वितीयमौर्वीम् इति कर्मधारये मौर्वी पदस्य प्राधान्यात् द्वितीयपदस्य गौणत्वं जातम्। तेन काव्यस्य चमत्कारहानिः। वपुर्विरूपाक्ष० इत्यादावपि कविराह– यद् हे!बालमगाक्षि! वरे अभीष्टाः ये गुणास्तेषु नैको पि अस्मिन् दश्यते तत् कथं त्वं तपसा लब्धुमेनमिच्छसि ? अत्र श्लोके अलक्ष्यजन्मता विधेया। अतः प्रधानीभूता। समासान्तर्गतत्वात् प्राधान्यं तस्यापगतमतः दोषभाक्।

**नञ्समासे अविमष्टविधेयांशः** - आनन्दसिन्धुरतिचापलशालिचित्त–सन्दाननैकसदनं क्षणमप्यमुक्ता। अत्र विरक्तं नायकं प्रति नायिकासखीनामुक्तिः। या नायिका क्षणमपि नायकेन न त्यक्ता तस्याः न कापि वार्तेदान श्रूयते। अस्मिन् श्लोके अमुक्ता इति निषेधो विधेयः। सच नञान्तर्गतत्वात् गुणीभूतः। तेन विधेयस्य स्पष्टप्रतीतिर्न भवतीति दूषकताबीजम्।

नञ्विषये शाब्दिकानां मतम् – भशादिभ्यो० (३.१.१२) इति सूत्रे भाष्यकता प्रतिपादितम्–द्विविधो नञ्। पर्युदास प्रसज्यश्च। पर्युदासे

तद्भिन्नस्य किन्तु तत्सदशस्य बोधो भवति। प्रसज्ये तु निषेधस्यैव बोधः। भर्तहरिणा वाक्यपदीये नञ्प्रकरणे विस्तरेणोक्तम् –

**द्वौ नञौ समाख्यातौ पर्युदासप्रसज्यकौ।**
**पर्युदासःसदशग्राही प्रसज्यस्तु निषेधकत्।**
**प्राधान्यं तु विधेर्यत्र प्रतिषेधे प्रधानता।**
**पर्युदासः स विज्ञेयः यत्रोत्तरपदेन नञ्।**
**अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।**
**प्रसज्यतु स विज्ञेयः क्रियया सह यत्र नञ्।**

उपर्युक्तपद्ये अमुक्त इत्यस्य स्थाने यदि न मुक्तेति प्रयोगः क्रियेत तर्हि दोषो निवर्तेत।

प्रसज्यो पि द्विविधो भवति। १/समस्तः २/असमस्तः। वस्तुतः प्रसज्ये समासो न भवति। तथापि क्वचित् समस्तप्रतिषेधो पि लोके दश्यते यथा – असूर्यंपश्याः राजदाराः। राजदाराः सूर्यं न पश्यन्तीति भावः। नित्यमन्तः पुरे निवसनात् सूर्यदर्शनं न कुर्वन्तीति भावः। एवमेव अश्राद्धभोजी ब्राह्मणः इत्यत्रापि श्राद्धे न भुनक्ति इत्यर्थे निपातनातदसमर्थो पि समासो भवति।

आचार्य मम्मटो पि – **जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।**
**अगध्नुराददे सो र्थानसक्तः सुखसमन्वभूत्।**

इति श्लोक अत्रस्तः अनातुरः अगध्नुः असक्तः पर्युदासस्य निदर्शकानुदाहरति।

**नवजलधरः सन्नद्धो यं न दप्त निशाचरः।**
**सुरधनुरिदं दूराकष्टं न नाम शरासनम्।।**
**अयमपि पटुर्धारासारो न बाणपरम्परा।**
**कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी।**

अस्मिन् श्लोके न दप्तः न शरासनम् न बाणपरम्परा न ममोर्वशी इत्यादयःप्रसज्यप्रतिषेधस्योदाहरणानि सन्ति।

**विरुद्धमतिकत्** - यदा काव्ये प्रकतार्थस्य प्रतिबन्धकीभूतो प्रकतार्थः बुद्धावारोहति तदा चमत्कारप्रतिबन्धकतया दोषोत्पत्तिर्भवति। तदुदाह्रियते।

**सुधाकरकराकारविशारदविचेष्टितः**
**अकार्यमित्रमेको सौ तस्य किं वर्णयामहे ?**

अत्र अकार्यमित्रमिति पदेन कार्यं विना यत् मित्रम् निस्वार्थमिति विवक्षितम् किन्तु कदाचित् अकार्ये मित्रमित्यति बोधो भवति। अकार्यम् –

इत्यत्र कार्यस्य नाम प्रयोजनस्याभावो कार्यमित्यर्थे भावार्थे व्ययीभावो भवति यथा निर्मक्षिकमित्यत्र मक्षिकाणामभावो निर्मक्षिकमिति।

ततः अकार्यं मित्रमकार्यमित्रमिति मयूरव्यंसकादित्वात् समासः। तथा च प्रयोजनं विनैव यन् मित्रमित्यर्थो त्र विवक्षितः। किन्तु अव्ययीभावसमासे नञ्समासे वा नास्यार्थस्य प्रतीतिर्भवति। अत्र विषये भट्टोजिराह– अर्थाभावे व्ययीभावे सहायं नञ्समासो विकल्प्यते (नञ् २.२.६) भाष्यमप्यत्र प्रमाणम्।

यथाह– कौमुदीकारः–रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति अद्भुतायामसंहितम् इति च भाष्यवार्त्तिकप्रयोगात्। तेन अनुपलब्धिः, अविवादः, अविघ्नम् इत्यादि सिद्धम्। सारतः इदमध्यवसेयम् यत् अव्ययीभावे नञ्समासे वाभीष्टार्थप्रतीतिर्न भवतीति विरुद्ध–मतिकद्दोषो जायते।

अपरत्र – **चिरकालपरिप्राप्तलोचनाननददायिनः।**

**कान्ता कान्तस्य सहसा विददाति गलग्रहम्।**

अस्मिन् श्लोके कविरराह – चिरकालेन समागतस्य प्रियस्य झटिति आलिङ्गनं करोति काचित् कान्ता। अत्र आलिङ्गनमित्यस्यार्थे गलग्रहं करोतीति प्रयोगः सहृदयानामुद्वेगं जनयति। यतो हि गलग्रहशब्दो रोगविशेषे रूढः। रूढ़िर्योगापहारिणीति नियमेन कण्ठग्रहपदेन आलिङ्गनार्थापेक्षया रोगविशेषस्यैव बोधो भवतीति दूषकताबीजम्। गलग्रहशब्देनार्धचन्द्रदानमपि प्रतीयते। अस्मिन् विषये व्याकरणैः परिभाषाद्वयं प्रतिपादितम–१– रूढ़िर्योगापहारिणी अथवा २–अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी इति। परिभाषाद्वयमिदम् रथकाराधिकरणन्याय–मूलकम्। रथकाराधिकरणन्यायस्येदं स्वरूपम्–वर्षासु रथकार आदधीत। इति श्रुतिवचनम्। अत्र रथकार शब्देनार्थद्वयस्य बोधो भवति। १–रथं करोतीति रथकारः २–त्रैवर्णिकः (क्षत्रियपुरुषात् वैश्यायामुत्पन्नः माहिष्यो भवति। वैश्यपुरुषात् शूद्रायामुत्पन्ना करणीत्युच्यते। माहिष्यात् करण्यामुत्पन्नो रथकार इत्युच्यते। अयमेवार्थो रूढ़ः। रथकारपदेनास्यै–वार्थस्य प्रतीतिः भवति।)। यदि रथकारशब्दः रथं करोतीत्यर्थे प्रयुज्येत तदा झटित्यर्थप्रतीतिर्न स्यात् उक्तोदाहरणे गलग्रह इत्यस्य स्थाने यदि कण्ठग्रहशब्दः प्रयुज्यते तदा दोषनिवत्तिः स्यात्।

**न त्रस्तं यदि नाम भूतकरुणासंतानशान्तात्मनः।**

**तेन व्यारुजता धनुर्भगवतो देवाद् भवानीपतेः।।**

इत्यादावपि भवानीपतिः शब्दः विरुद्धं धियमुत्पादति। अत्र भवानीपतिः शब्दः भवान्याः पत्यन्तरे प्रतीतिं करोति। पुंयोगादाख्यायाम् (४.१.४८) इति पाणिनिसूत्रेण भवशब्दात् ङीष् प्रत्यये इन्द्रवरुण० (४.१.७०) इत्यादिसूत्रेण आनुगागमे च कते सिद्धः भवानीपतिशब्दो भवान्याः पतिः इति बोधं जनयति न तु भवस्य शिवस्य वा। एतदेव दूषकताबीजम्।

उपर्युक्ताःपददोषा वाक्ये पि भवन्ति तदा वाक्यदोषत्वेन परिगण्यन्ते। अत्र केवलं पददोषानामेव व्याकरणमूलकत्वं स्फोरितम्।

*व्याख्याता*
*संस्कत इन्दिराकला सङ्गीत*
*विश्वविद्यालयः*
*खैरागढ (छ.ग.)*

———ooo———